# Shiva Stuti

स्फुटं स्फटिकसप्रभं स्फुटितहाटकश्रीजटं
शशाङ्कदलशेखरं कपिलफुल्लनेत्रत्रयम् ।
तरक्षुवरकृत्तिमद्भुजगभूषणं भूतिमत्
कदा तु शितिकण्ठ ते वपुरवेक्षते वीक्षणम् ॥१॥

त्रिलोचन विलोचने लसति ते ललामायिते
स्मरो नियमघस्मरो नियमिनामभूद्भस्मसात् ।
स्वभक्तिलतया वशीकृतवती सतीयं सती
स्वभक्तवशगो भवानपि वशी प्रसीद प्रभो ॥२॥

महेश महितोऽसि तत्पुरुष पूरुषाग्र्यो भवान्
अघोर रिपुघोर तेऽनवम वामदेवाञ्जलिः ।
नमः सपदिजात ते त्वमिति पञ्चरूपोऽञ्चितः
प्रपञ्चय च पञ्चवृन्मम मनस्तमस्ताडय ॥३॥

रसाघनरसानलानिलवियद्विवस्वद्विधु-
प्रयष्टृषु निविष्टमित्यज भजामि मूर्त्यष्टकम् ।
प्रशान्तमुत भीषणं भुवनमोहनं चेत्यहो
वपूंषि गुणपुंषि तेऽहमहमात्मनोऽहं भिदे ॥४॥

विमुक्तिपरमाध्वनां तव षडध्वनामास्पदं
पदं निगमवेदिनो जगति वामदेवादयः ।
कथञ्चिदुपशिक्षिता भगवतैव संविद्रते
वयं तु विरलान्तराः कथमुमेश तन्मन्महे ॥५॥

कठोरितकुठारया ललितशूलया बाहया
रणड्डमरया स्फुरद्धरिणया सखट्वाङ्गया ।
चलाभिरचलाभिरप्यगणिताभिरुन्नृत्यतः
चतुर्दश जगन्ति ते जय जयेत्ययुर्विस्मयम् ॥६॥

पुरत्रिपुररन्धनं विविधदैत्यविध्वंसनं
पराक्रमपरम्परा अपि परा न ते विस्मयः ।
अमर्षबलहर्षितक्षुभितवृत्तनेत्रत्रयो-
ज्ज्वलज्ज्वलन हेलया शलभितं हि लोकत्रयम् ॥७॥

सहस्रनयनो गुहः सहसहस्ररश्मिर्विधुः
बृहस्पतिरुताप्पतिः ससुरसिद्धविद्याधराः ।
भवत्पदपरायणाः श्रियमिमामगुः प्रार्थिनां
भवान् सुरतरुर्दृशं दिश शिवां शिवावल्लभ ॥८॥

तव प्रियतमादतिप्रियतमं सदैवान्तरं
पयस्युपहितं घृतं स्वयमिव श्रियो वल्लभम् ।
विभिद्य लघुबुद्धयः स्वपरपक्षलक्षायितं
पठन्ति हि लुठन्ति ते शठहृदः शुचा शुण्ठिताः ॥९॥

विलासनिलयश्चिता तव शिरस्ततिर्मालिका
कपालमपि ते करे त्वमशिवोऽस्यनन्तर्धियाम् ।
तथाऽपि भवतः पदं शिव शिवेत्यदो जल्पता-
मकिञ्चन न किञ्चन वृजिनमस्त्यभस्मीभवत् ॥१०॥

त्वमेव किल कामधुक् सकलकाममापूरयन्
अपि त्रिनयनः सदा वहसि चात्रिनेत्रोद्भवम् ।

विषं विषधरान् दधत् पिबसि तेन चानन्दवान्
विरुद्धचरितोचिता जगदधीश ते भिक्षुता ॥११॥

नमः शिव शिवाशिवाशिव शिवार्ध कृन्ताशिवं
नमो हर हराहराहरहरान्तरीं मे दृशम् ।
नमो भव भवाभव प्रभव भूतयो सम्पदां
नमो मृड नमो नमो नम उमेश तुभ्यं नमः ॥१२॥

सतां श्रवणपद्धतिं सरतु सन्नतोक्तेत्यसौ
शिवस्य करुणाङ्कुरात् प्रतिकृतात् सदा सोदिता ।
इति प्रथितमानसो व्यधित नाम नारायणः
शिवस्तुतिमिमां शिवां लिकुचसूरिसूनुः सुधीः ॥१३॥

।। इति श्रीनारायणपण्डिताचार्यविरचिता शिवस्तुतिः ।।